## ३५ पञ्चत्रिंश दशकः - अनुग्रह वैचित्र्यम्

भाग्योदये त्रीणि भवन्ति नूनं मनुष्यता सज्जन सङ्गमश्च ।
त्वदीय माहात्म्य कथा श्रुतिश्च यतः पुमांस्त्वत्पद भक्तिमेति ॥ ३५-१॥

ततः प्रसीद स्यखिलार्थ कामान् भक्तस्य यच्छस्यभयं च मातः ।
क्षमां कृतागस्सु करोषि चार्योः अन्योन्य वैरं शमयस्यनीहा ॥ ३५-२॥

दुष्कीर्ति भीत्या पृथया कुमार्या त्यक्तं तटिन्यां सुतमर्क लब्धम् ।
संप्रार्थिता त्वं परिपालयन्ती प्रादर्शयः स्वं करुणा प्रवाहम् ॥ ३५-३॥

सुतान् कुरुक्षेत्र रणे हतान् स्वान् दिदृक्षवे मातृगणाय कृष्णः ।
संप्रार्थितस्त्व त्करुणाभिषिक्तः प्रदर्श्य सर्वान् समतोषयच्च ॥ ३५-४॥

वणिक् सुशीलः खलु नष्टवित्तो व्रतं चरन् प्राङ्नवरात्र मार्यः ।
त्वां देवि सम्पूज्य दरिद्रभावात् मुक्तः क्रमाद्वित्त समृद्धिमाप ॥ ३५-५॥

देवद्रुहो देवि रणे त्वयैव दैत्या हता गर्हित धर्मशास्त्राः ।
प्रह्लाद मुख्या नसुरान् स्वभक्तान् देवांश्च सन्त्यक्त रणानकार्षीः ॥ ३५-६॥

पुरन्दरे पाप तिरोहिते तत् स्थानाधिरूढा न्नहुषात्स्मरार्तात् ।
भीता शची त्वां परिपूज्य दृष्ट्वा पतिं क्रमाद्भीति विमुक्तिमाप ॥ ३५-७॥

शप्तो वसिष्ठेन निमि र्विदेहो भूत्वाऽपि देवि त्वदनुग्रहेण ।
ज्ञानं परं प्राप निमेः प्रयोगात् निमेषिणो जीवगणा भवन्ति ॥ ३५-८॥

हा भार्गवा लोभ विकोप चित्तैः प्रपीडिता हैहय वंश जातैः ।
हिमाद्रि माप्ता भवतीं प्रपूज्य प्रसाद्य भीतेः खलु मुक्तिमापुः ॥ ३५-९॥

दस्रौ युवानां च्यवनं पतिं च समान रूपा नभिदृश्य मुग्धा ।
सती सुकन्या तव संस्मृताया भक्त्या प्रसादा त्स्वपतिं व्याजानात् ॥ ३५-१०॥

सत्यव्रतो विप्रवधूं प्रसह्य हर्ता निरस्तो जनकेन राज्यात् ।
वसिष्ठ शप्तोऽपि तव प्रसादात् राज्येऽभिषिक्तोऽथ दिवं गतश्च ॥ ३५-११॥

हा हा हरिश्चन्द्र नृपो विपत्सु मग्नः शताक्षीं परदेवतां त्वाम् ।
संस्मृत्य सद्यः स्वविप न्निवृत्तः कारुण्यतस्ते सुरलोकमाप ॥ ३५-१२॥

अगस्त्य पूजां परिगृह्य देवि विभासि विन्ध्याद्रि निवासिनी त्वम् ।
द्रक्ष्ये कदा त्वां मम देहि भक्तिं कारुण्यमूर्ते सततं नमस्ते ॥ ३५-१३॥